# संस्कृतवार्ता:

दिनाङ्क :-02.11.2025 प्रात: - 06:55

<u>प्रधानमन्त्री/रायपुरयात्रा</u>

प्रधानमन्त्री नरेन्द्र-मोदी अवदत् यत् अचिरम् एव छत्तीसगढं समेत्य देशस्य प्रत्येकम् अपि भागः माओवादि-हिंसा-मुक्तः भविष्यति। रायपुरे छत्तीसगढ-रजत-जयन्ती-समारोहं संबोधयन् प्रधानमन्त्री अवदत् यत् अद्यत्वे छत्तीसगढस्य बस्तर-सदृशेषु क्षेत्रेषु भयस्य अपेक्षया उत्सवस्य वातावरणम् अस्ति।

प्रधानमन्त्री गतवासरे छत्तीसगढस्य यात्रावधौ नवा-रायपुरस्थले छत्तीसगढ-विधानसभायाः नूतन-भवनस्य उद्घाटनम् अकरोत्। अत्रावसरे प्रधानमन्त्री पूर्व-प्रधानमन्त्रिणः भारत-रत्न-विभूषितस्य अटल-बिहारी-वाजपेयिवर्यस्य प्रतिमामपि अनावृतवान्। उपस्थितं जनसमूहं सम्बोधयन् प्रधानमन्त्री अवदत् यत् अद्य सम्पूर्णदेशः स्वकीयं न्यासं संरक्ष्य विकासमार्गे अग्रे प्रसरति। सः अवदत् यत् एष: एव भावः केन्द्रीय-सर्वकारस्य प्रत्येकस्मिन् निर्णये नीतौ च दृश्यते। प्रधानमन्त्री अवदत् यत् भारतस्य एषः दृष्टिकोणः छत्तीसगढ-विधानसभायाः नूतन-भवने स्पष्टतया द्रष्टुं शक्यते, येन राज्यस्य समृद्ध-सांस्कृतिक-परम्परा प्रदर्श्यते।

--------------------------------------

<u>आकाशवाणी-संगीत-सम्मेलनम्</u>

प्रसार-भारती संस्कृति-मन्त्रालयस्य सहयोगेन अद्य आकाशवाणी-संगीत-सम्मेलनस्य सप्त-षष्टितमस्य संस्करणस्य शुभारम्भं करिष्यति। एतत् सम्मेलनम् अस्य मासस्य ऊनत्रिंशद्-दिनाङ्कं यावत् देशस्य चतुर्विंशतिषु केन्द्रेषु प्रवर्तिष्यते। सूचना-प्रसारण-मन्त्रालयेन उक्तं यत् आकाशवाणी-संगीत-सम्मेलनं भारतस्य प्रख्यात-सांस्कृतिक-परम्परायाः प्रतीक-रूपम् अस्ति। अत्र देशस्य श्रोतृभ्यः हिन्दुस्तानी-कर्णाटिक-लोकसङ्गीतानुभवं प्राप्तुम् अवसरः प्राप्यते। प्रसारभारत्याः मुख्यकार्यकार्यधिकारी गौरव-द्विवेदी सम्मेलनस्य विषये विस्तृत-विवरणं प्रदाय

प्रावोचत् यत् कोविड्-महारोग-विरामस्य अनन्तरम् अयं महोत्सवः नूतनरूपेण पुनः समक्षम् आगच्छति।

-------------------------------------

राष्ट्रपतिः/उत्तराखण्डयात्रा

राष्ट्रपतिः द्रौपदी-मुर्मूः अद्यप्रभृति उत्तराखण्डस्य त्रिदिवसीय-यात्रायां भविष्यति। अद्य राष्ट्रपतिः हरिद्वारस्थे पतञ्जलि-विश्वविद्यालयस्य द्वितीये दीक्षान्त-समारोहे उपस्थिता भविष्यति। सोमवासरे उत्तराखण्ड-राज्यस्य रजत-जयन्त्याः अवसरे देहरादूने उत्तराखण्ड-विधानसभां सम्बोधयिष्यति। ततः नैनीताले राजभवनस्य पञ्चविंशत्यधिक-शत-वर्ष-पूर्त्यवसरे एकस्मिन् कार्यक्रमे अपि सहभागं करिष्यति।

-------------------------------------

संस्कृत-साप्ताहिकी

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।

-------------------------------------

क्रिकेट्

महिलानाम् एकदिवसीय-क्रिकेट्-विश्वचषक-स्पर्धा-मालिकायाः निर्णायके द्वन्द्वे भारतम् अद्य दक्षिणाफ्रीका-दलं सम्मुखीकरिष्यति। एषा स्पर्धा नवमुम्बय्यां डी.वाई.पाटिल-क्रीडाङ्गणे अपराह्णे त्रि-वादने आरप्स्यते। इतः पूर्वं उपान्त्यचक्रीये द्वन्द्वे भारतेन आस्ट्रेलिया-दलं पञ्चक्रीडकैः पराजितम्।

।।इति वार्ता:।।